# Mantrabhajanadinirupanam

# મન્ત્રભજનાદિનિરૂપણમ્

## Document Information

Text title : Mantrabhajanadinirupanam

File name : mantrabhajanAdinirUpaNam.itx

Category : misc, lakShmInArAyaNIyasaMhitA, mantra

Location : doc_z_misc_general

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 143/100-111||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# મન્ત્રભજનાદિનિરૂપણમ્

અર્થં કામં ચેહમાનાઃ પ્રજા હ્રાસં વ્રજન્ત્યપિ ।
તત્ર મન્ત્રં જપેન્મે ચ ગાયત્ર્યાખ્યં નિરન્તરમ્ ॥ ૧૦૦॥

“ૐ ભૂર્ભુવઃ સ્વઃ, શ્રીઘનશ્યામાય વિદ્મહે ।
નીલકણ્ઠાય ધીમહિ, તન્નો હરિઃ પ્રચોદયાત્” ॥ ૧૦૧॥

“ૐ ભૂર્ભુવઃ સ્વઃ, શ્રીબાલકૃષ્ણાય વિદ્મહે ।
અનાદિકૃષ્ણાય ધીમહિ, તન્નઃ કૃષ્ણઃ પ્રચોદયાત્” ॥ ૧૦૨॥

“ૐ ભૂર્ભુવઃ સ્વઃ, શ્રીનારાણાય વિદ્મહે ।
વાસુદેવાય ધીમહિ, તન્નો વિષ્ણુઃ પ્રચોદયાત્” ॥ ૧૦૩॥

“ૐ શ્રીબ્રહ્મપ્રિયાવલ્લભાય સ્વાહા નમઃ” જપેત્ ।
“ૐશ્રીહરિપ્રિયાવલ્લભાય નમઃ” જપેત્ તથા ॥ ૧૦૪॥

ષટ્લક્ષજપકર્તા વૈ તરત્યેવ ભવાર્ણવાત્ ।
દ્વાપરે મન્ત્રમેનં વૈ તતો જપેત્ પ્રમુક્તયે ॥ ૧૦૫॥

“અનાદિશ્રીકૃષ્ણનારાયણ કૃષ્ણ શ્રિયઃપતે ।
રાધાપતે પરબ્રહ્મ ગોપીપતે જયાપતે ॥ ૧૦૬॥

લલિતાશ્રીપતે પ્રજ્ઞાપતે પદ્માવતીપતે ।
સુખદાશ્રીપતે લક્ષ્મીપતે શ્રીમાણિકીપતે ॥ ૧૦૭॥

હંસગરુડવારણતુરગાધિપતે પ્રભો ।
સતામ્પતે સતીસાધ્વીપતે સર્વપતે વિભો ॥ ૧૦૮॥

ભગવન્ પુણ્ડરીકાક્ષ તારયાઽસ્માન્ ભવાર્ણવાત્ ।
દ્વાપરાદ્ઘોરરૂપાદ્વૈ ચાન્તિમસમયાત્મકાત્” ॥ ૧૦૯॥

ઇત્યર્થયેદ્ભગવન્તં પરમેશં સનાતનમ્ ।
પૂજયેન્માં ધારયેચ્ચ હૃદયે મયિ ચાર્પયેત્ ॥ ૧૧૦॥

એવં મોક્ષં દ્વાપરેઽન્તે ચાપ્નુયુર્માનવા રમે ।
પઠનાચ્છ્રવણાચ્ચાપિ સંહિતાયા મમાપિ ચ ॥ ૧૧૧॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૪૨-અધ્યાયાન્તર્ગતં દ્વાપરયુગે ધર્માર્થાદિમોક્ષપ્રાપ્ત્યર્થં
મન્ત્રભજનાદિનિરૂપણં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૪૩/૧૦૦-૧૧૧॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 143/100-111..

Proofread by PSA Easwaran

---

*Mantrabhajanadinirupanam*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*